| अथोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| वैश्यवन्धकीगमनम्। | प्रतोददानम्। | ० | ० | यथाशक्ति। |
| शूद्रबन्धकीगमनम्। | स्नानपुर:सरप्राणायाम:। | ० | ० | ० |
| | एतानि बन्धकीगमनप्रायश्चित्तानि सवर्णानुलोमप्रतिलोमविषयाणि ॥ * ॥ | | | |
| अथ व्युत्क्रमविवाह:। तत्र ब्राह्मणस्य प्रथमत: क्षत्रियादिविवाह:। | दारव्यतिक्रमी खराजिनं बहिर्लोम परिधाय दारव्यतिक्रमिणे भिक्षां देहीति सप्तागाराणि चरेत्। सा वृत्ति: षण्मासान्। दारव्यतिक्रमी ब्राह्मणक्षत्रियवैश्यकन्याविवाहमकृत्वा यो ब्राह्मण: शूद्राविवाहं करोति स उच्यते। एतदनापदि सकृदज्ञानविषयम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनव:। | २२॥० कार्षापणा:। | यथाशक्ति। |
| | आपदि त्वाह शातातप:। ब्राह्मणो राजन्यापूर्व्वां द्वादशरात्रं चरित्वा निर्व्विशेत् ताञ्चैवोपगच्छेत्। | १ धेनु:। | ३ कार्षापणा:। | यथाशक्ति। |
| | वैश्यापूर्व्वां तप्तकृच्छ्रम्। | सपादधेन्वसम्भवात् २ धेनू। | ३॥०कार्षापणा:। | यथाशक्ति। |
| | शूद्रापूर्व्वां कृच्छ्रातिकृच्छ्रम्। | ५ धेनव:। | १५ कार्षापणा:। | यथाशक्ति। |
| | अनापदि ज्ञानाभ्यासे मनूक्तत्रैवार्षिकव्रतम्। | ४५ धेनव:। | १३५ कार्षापणा:। | २५ गाव:। अशक्तौ २५ कार्षापणा:। |
| वेश्यागमनम्। | प्राजापत्यम्। | १ धेनु:। | ३ कार्षापणा:। | यथाशक्ति। |
| पञ्चाधिकपुरुषगामिनी वेश्या। | अभ्यासे चान्द्रायणम्। | ८ धेनव:। | २२॥०कार्षापणा:। | यथाशक्ति। |
| रजस्वलागमनम्। | त्रिरात्रोपवास:। घृतप्राशनञ्च। | ० | १॥० कार्षापण:। | यथाशक्ति। |
| | एतत् कामत: सकृद्गमने। | | | |
| | अभ्यासे तु द्वैगुण्यादिकम्। | | | |
| ऋतौ भार्य्यानभिगमनम्। | त्रिरात्रोपवास:। | ० | १॥० कार्षापण:। | यथाशक्ति। |
| | ज्ञानाभ्यासे प्राजापत्यम्। | १ धेनु:। | ३ कार्षापणा:। | यथाशक्ति। |
| पर्व्वसु स्त्रीगमनम्। | एकोपवास:। | ० | ॥० पणा:। | यथाशक्ति। |
| श्राद्धदिने मैथुनम्। | एकोपवास:। | ० | ॥० पणा:। | यथाशक्ति। |
| दिवामैथुनम्। | एकाहं यावकपानम्। नग्नस्य स्नाने नग्नपरस्त्रीदर्शनेऽप्येवं प्रायश्चित्तम्। | ० | ० | ० |
| | अभ्यासे प्रायश्चित्तावृत्ति: ॥ * ॥ | | | |
| अथ स्त्रीव्यभिचार:। | समोत्तमवर्णेसु सकृदुपगमे प्राजापत्यम्। | १ धेनु:। | ३ कार्षापणा:। | यथाशक्ति। |
| | द्विरभ्यासे पराक:। | ५ धेनव:। | १५ कार्षापणा:। | यथाशक्ति। |
| | त्रिरभ्यासे चान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनव:। | २२॥० कार्षापणा:। | यथाशक्ति। |
| अन्त्यजागमनम्। अर्थात् रजकचर्म्मकारनटवरुड़कैवर्त्तमेदभिल्लवेणुजीविशैलूषाणां स्त्रीषु गमनम्। | अज्ञानतश्चान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनव:। | २२॥० कार्षापणा:। | यथाशक्ति। |
| | ज्ञानाद्द्वैगुण्यम्। | | | |
| | चतुर्व्विंशतिवारगमने द्वादशवार्षिकव्रतम्। | १८० धेनव:। | ५४० कार्षापणा:। | १०० गाव:। अशक्तौ १०० कार्षापणा:। |
| | एतदज्ञानत:। | | | |
| | ज्ञानतो द्वैगुण्यम्। अव्यवहार्य्यता च। | | | |
| कापालिकस्त्रीगमनम्। | ज्ञानादब्दकृच्छ्रम्। | ३० धेनव:। | ६० कार्षापणा:। | यथाशक्ति। |
| | अज्ञानाच्चान्द्रायणद्वयम्। | १५ धेनव:। | ४५ कार्षापणा:। | यथाशक्ति। |
| अथ तिर्य्यग्योनिगमनम्। तत्र गोवर्ज्जपशुगमनम्। | सचेलस्नानपूर्व्वकं गोभ्यो यवसभारदानम्। | | | |
| | इदं सकृद्गमने। | | | |
| गोगमनम्। | गोवधोक्तसाधिकव्रतम्। | ४ धेनव:। | १२ कार्षापणा:। | यथाशक्ति। |
| | एतत् सकृद्गमने। | | | |
| | अभ्यासे संवत्सरं प्राजापत्यम्। | ३० धेनव:। | ६० कार्षापणा:। | १७ गाव:। अशक्तौ १६॥-९६। कार्षापणा:। |